# देवी खड्गमालास्तोत्ररत्नम्

{॥ देवी खड्गमालास्तोत्ररत्नम् ॥}

प्रार्थना

ह्रीङ्काराननगर्भितानलशिखां सौः क्लीङ्कलाम् बिभ्रतीं

सौवर्णाम्बरधारिणीं वरसुधाधौतां त्रिनेत्रोज्ज्वलाम् ।

वन्दे पुस्तकपाशमङ्कुशधरां स्रग्भूषितामुज्ज्वलां

त्वां गौरीं त्रिपुरां परात्परकलां श्रीचक्रसञ्चारिणीम् ॥

अस्य श्री शुद्धशक्तिमालामहामन्त्रस्य, उपस्थेन्द्रियाधिष्ठायी

वरुणादित्य ऋषयः देवी गायत्री छन्दः सात्विक

ककारभट्टारकपीठस्थित कामेश्वराङ्कनिलया महाकामेश्वरी श्री

ललिता भट्टारिका देवता, ऐं बीजं क्लीं शक्तिः, सौः कीलकं मम

खड्गसिद्ध्यर्थे सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः, मूलमन्त्रेण

षडङ्गन्यासं कुर्यात् ।

ध्यानम्

तादृशं खड्गमाप्नोति येव हस्तस्थितेनवै

अष्टादशमहाद्वीपसम्राड्भोक्ताभविष्यति

आरक्ताभान्त्रिनेत्रामरुणिमवसनाम् रत्नताटङ्करम्यां

हस्ताम्भोजैस्सपाशाङ्कुशमदनधनुस्सायकैर्विस्फुरन्तीम् ।

आपीनोत्तुङ्गु वक्षोरुहकलशलुठत्तारहारोज्ज्वलाङ्गीं

ध्यायेदम्भोरुहस्थामरुणिमवसनामीश्वरीमीश्वराणाम् ॥

लमित्यादिपञ्च पूजाम् कुर्यात्, यथाशक्ति मूलमन्त्रम् जपेत् ।

लं - पृथिवीतत्त्वात्मिकायै श्री ललितात्रिपुरसुन्दरी पराभट्टारिकायै

गन्धं परिकल्पयामि - नमः

हं - आकाशतत्त्वात्मिकायै श्री ललितात्रिपुरसुन्दरी पराभट्टारिकायै पुष्पं

परिकल्पयामि - नमः

यं - वायुतत्त्वात्मिकायै श्री ललितात्रिपुरसुन्दरी पराभट्टारिकायै धूपं

परिकल्पयामि - नमः

रं - तेजस्तत्त्वात्मिकायै श्री ललितात्रिपुरसुन्दरी पराभट्टारिकायै दीपं

परिकल्पयामि - नमः

वं - अमृततत्त्वात्मिकायै श्री ललितात्रिपुरसुन्दरी पराभट्टारिकायै

अमृतनैवेद्यं परिकल्पयामि - नमः

सं - सर्वतत्त्वात्मिकायै श्री ललितात्रिपुरसुन्दरी पराभट्टारिकायै

ताम्बूलादिसर्वोपचारान् परिकल्पयामि - नमः

श्री देवी सम्बोधनं - १

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमस्त्रिपुरसुन्दरि,

न्यासाङ्गदेवताः -६

हृदयदेवि, शिरोदेवि, शिखादेवि, कवचदेवि, नेत्रदेवि,

अस्त्रदेवि,

तिथिनित्यादेवताः -१६

कामेश्वरि, भगमालिनि, नित्यक्लिन्ने, भेरुण्डे, वह्निवासिनि,

महावज्रेश्वरि, शिवदूति, त्वरिते, कुलसुन्दरि, नित्ये,

नीलपताके, विजये, सर्वमङ्गले, ज्वालामालिनि, चित्रे,

महानित्ये,

दिव्यौघगुरवः -७

परमेश्वर, परमेश्वरि, मित्रेशमयि, उड्डीशमयि,

चर्यानाथमयि, लोपामुद्रमयि, अगस्त्यमयि,

सिद्धौघगुरवः -४

कालतापशमयि, धर्माचार्यमयि, मुक्तकेशीश्वरमयि, दीपकलानाथमयि,

मानवौघगुरवः -८

विष्णुदेवमयि, प्रभाकरदेवमयि, तेजोदेवमयि, मनोजदेवमयि,

कल्याणदेवमयि, वासुदेवमयि, रत्नदेवमयि, श्रीरामानन्दमयि,

श्रीचक्र प्रथमावरणदेवताः -३२

अणिमासिद्धे, लघिमासिद्धे, गरिमासिद्धे, महिमासिद्धे,

ईशित्वसिद्धे, वशित्वसिद्धे, प्राकाम्यसिद्धे, भुक्तिसिद्धे,

इच्छासिद्धे, प्राप्तिसिद्धे, सर्वकामसिद्धे, ब्राह्मि,

माहेश्वरि, कौमारि, वैष्णवि, वाराहि, माहेन्द्रि, चामुण्डे,

महालक्ष्मि, सर्वसङ्क्षोभिणि, सर्वविद्राविणि, सर्वाकर्षिणि,

सर्ववशङ्करि, सर्वोन्मादिनि, सर्वमहाङ्कुशे, सर्वखेचरि,

सर्वबीजे, सर्वयोने, सर्वत्रिखण्डे, त्रैलोक्यमोहन

चक्रस्वामिनि, प्रकटयोगिनि,

श्रीचक्र द्वितीयावरणदेवताः -१८

कामाकर्षिणि, बुद्ध्याकर्षिणि, अहंकाराकर्षिणि, शब्दाकर्षिणि,

स्पर्शाकर्षिणि, रूपाकर्षिणि, रसाकर्षिणि, गन्धाकर्षिणि,

चित्ताकर्षिणि, धैर्याकर्षिणि, स्मृत्याकर्षिणि, नामाकर्षिणि,

बीजाकर्षिणि, आत्माकर्षिणि, अमृताकर्षिणि, शरीराकर्षिणि,

सर्वाशापरिपूरकचक्रस्वामिनि, गुप्तयोगिनि,

श्रीचक्र तृतीयावरणदेवताः -१०

अनङ्गकुसुमे, अनङ्गमेखले, अनङ्गमदने, अनङ्गमदनातुरे,

अनङ्गरेखे, अनङ्गवेगिनि, अनङ्गाङ्कुशे, अनङ्गमालिनि,

सर्वसङ्क्षोभणचक्रस्वामिनि, गुप्ततरयोगिनि,

श्रीचक्र चतुर्थावरणदेवताः -१६

सर्वसङ्क्षोभिणि, सर्वविद्राविनि, सर्वाकर्षिणि,

सर्वह्लादिनि, सर्वसम्मोहिनि, सर्वस्तम्भिनि, सर्वजृम्भिणि,

सर्ववशङ्करि, सर्वरञ्जनि, सर्वोन्मादिनि, सर्वार्थसाधिके,

सर्वसम्पत्तिपूरिणि, सर्वमन्त्रमयि, सर्वद्वन्द्वक्षयङ्करि,

सर्वसौभाग्यदायकचक्रस्वामिनि, सम्प्रदाययोगिनि,

श्रीचक्र पञ्चमावरणदेवताः -१२

सर्वसिद्धिप्रदे, सर्वसम्पत्प्रदे, सर्वप्रियङ्करि,

सर्वमङ्गलकारिणि, सर्वकामप्रदे, सर्वदुःखविमोचनि,

सर्वमृत्युप्रशमनि, सर्वविघ्ननिवारिणि, सर्वाङ्गसुन्दरि,

सर्वसौभाग्यदायिनि, सर्वार्थसाधकचक्रस्वामिनि,

कुलोत्तीर्णयोगिनि,

श्रीचक्र षष्टावरणदेवताः -१२

सर्वज्ञे, सर्वशक्ते, सर्वैश्वर्यप्रदायिनि, सर्वज्ञानमयि,

सर्वव्याधिविनाशिनि, सर्वाधार स्वरूपे, सर्वपापहरे,

सर्वरक्षास्वरूपिणि, सर्वेप्सितफलप्रदे, सर्वरक्षाकर

चक्रस्वामिनि, निगर्भयोगिनि,

श्रीचक्र सप्तमावरणदेवताः -१०

वशिनि, कामेश्वरि, मोदिनि, विमले, अरुणे, जयिनि,

सर्वेश्वरि, कौलिनिवशिनि, सर्वरोगहरचक्रस्वामिनि,

रहस्ययोगिनि,

श्रीचक्र अष्टमावरणदेवताः -९

बाणिनि, चापिनि, पाशिनि, अङ्कुशिनि, महाकामेश्वरि,

महावज्रेश्वरि, महाभगमालिनि, सर्वसिद्धिप्रदचक्रस्वामिनि,

अतिरहस्ययोगिनि,

श्रीचक्र नवमावरणदेवताः -३

श्री श्री महाभट्टारिके, सर्वानन्दमयचक्रस्वामिनि,

परापरातिरहस्ययोगिनि,

नवचक्रेश्वरी नामानि -९

त्रिपुरे, त्रिपुरेशि, त्रिपुरसुन्दरि, त्रिपुरवासिनि,

त्रिपुराश्रीः, त्रिपुरमालिनि, त्रिपुरसिद्धे, त्रिपुराम्बा,

महात्रिपुरसुन्दरि,

श्रीदेवी विशेषणानि - नमस्कारनवाक्षरीच -९

महामहेश्वरि, महामहाराज्ञि, महामहाशक्ते, महामहागुप्ते,

महामहाज्ञप्ते, महामहानन्दे, महामहास्कन्धे, महामहाशये,

महामहा श्रीचक्रनगरसाम्राज्ञि, नमस्ते नमस्ते नमस्ते नमः ।

फलश्रुतिः

एषा विद्या महासिद्धिदायिनी स्मृतिमात्रतः ।

अग्निवातमहाक्षोभे राजाराष्ट्रस्यविप्लवे ॥

लुण्ठने तस्करभये सङ्ग्रामे सलिलप्लवे ।

समुद्रयानविक्षोभे भूतप्रेतादिके भये ॥

अपस्मारज्वरव्याधिमृत्युक्षामादिजेभये ।

शाकिनी पूतनायक्षरक्षःकूष्माण्डजे भये ॥

मित्रभेदे ग्रहभये व्यसनेष्वाभिचारिके ।

अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेन्नरः ॥

सर्वोपद्रवनिर्मुक्तस्साक्षाच्छिवमयोभवेत् ।

आपत्कालेनित्यपूजाम् विस्तारात्कर्तुमारभेत् ॥

एकवारं जपध्यानम् सर्वपूजाफलं लभेत् ।

नवावर्णदेवीनां ललिताया महौजनः ॥

एकत्रगणनारूपोवेदवेदाङ्गगोचरः ।

सर्वागमरहस्यार्थः स्मरणात्पापनाशिनी ॥

ललितायामहेशान्या माला विद्यामहीयसि ।

नरवश्यं नरेन्द्राणां वश्यं नारीवशङ्करम् ॥

अणिमादिगुणैश्वर्यं रञ्जनं पापभञ्जनम् ।

तत्तदावरणस्थायि देवताबृन्दमन्त्रकम् ॥

मालामन्त्रं परम् गुह्यां परं धामप्रकीर्तितम् ।

शक्तिमालापञ्चधास्याच्छिवमालाचतादृशि ॥

तस्माद्गोप्यतराद्गोप्यं रहस्यं भुक्तिमुक्तिदम् ॥

इति श्री वामकेश्वरतन्त्रे उमामहेश्वरसंवादे

देवीखड्गमालास्तोत्ररत्नं समाप्तम् ।

ब्igskip

Encoded by Sarada Susarla

Proofread by Sarada Susarla; Anantanarayanan, Sunder Hattangadi, Ajit Krishnan

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Devi Khadgamala Stotra Ratnam Lyrics in Devanagari PDF
% File name : khadgamala.itx
% Category : tantra
% Location : doc_devii

% Author : Unknown
% Language : Sanskrit
% Subject : tantra/hinduism/devi worship
% Transliterated by : Sarada Susarla
% Proofread by : Sarada Susarla; Anantanarayanan, Sunder Hattangadi, Ajit Krishnan
% Description-comments : Vamakeshvara Tantra
% Latest update : September 28, 2011, December 13, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 14, 2015 ] at Stotram Website